Shri Raghunath Temple MSS. Library,
JAMMU

No. ४७४५

Title महिम्नः स्तोत्र टीका

Author ×

Extent २६ पत्राणि Age ×

Subject भक्तिशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

महिम्नस्तोत्रम् टीकासहितम्

४७४५

4745

starting from 2 to 17.

1 MISSING.

F. = 16

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीं माहात्म्यस्य स्तोतुमशक्यत्वेपि स्तुवतो यो दोषस्तं परिहर्तुमाह हे पुरमथन हे ब्र
ह्मन् तव सुरगुरोर्बृहस्पतेरपि वाग् विस्मयपदं किं आश्चर्यस्थानं भवति किं न भवति
इत्यर्थः किंभूतस्य तव वाचो गिरो निर्मितवतो रचयतः किंभूताः वाचः मधुस्फीता
मधुना माधुर्यगुणेन स्फीताः युक्ताः पुनः किंभूताः परमममृतं अमृतरूपं अमृतं स्व

मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि सुरगुरोर्वि
स्मयपदं मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथ
न बुद्धिर्व्यवसिता २

दा

स्वरूपप्रतिपादकत्वादमृतमित्युपचारः अस्मादृशां किं पुनः यद्येवं तर्हि स्तुतिः
किमर्थं प्रारभ्यते इत्याह मम तु बुद्धिस्त्वेतां मदीयां वाणीं भवतस्तव गुणकथनपुण्येन पुना
वववसिता २ मीत्यस्मिन्नर्थेऽङ्गीकृता यमात्मा स्तोतेः सावकाशत्वं प्रतिपाद्येदानीं येमीमांसकादयः स्व
रोनास्तीति वदन्ति तान्निराकर्तुमाह तवैश्वर्यं २

द्वः

© Dharmartha Trust J&K. Digitized by eGangotri

म॰टी॰ हे वरद अभयद तव यदैश्वर्यं तज्जगदुदयरक्षाप्रलयकृत् जगतां लोकानां उदयः उत्प
त्तिः स च रक्षा परिपालनं प्रलयो विनाश इत्येतेषां विधानं करोतीति तत्कृत् किंभूतं त्रयी
२ वस्तु त्रयी वेदत्रयं वस्तु ब्रह्मविष्णुहररूपात्मकं स्वरूपं वस्तु प्रतिपाद्यं तथापि ति
सृषु तनुषु मूर्तिषु व्यस्तं विभज्य निहितं किंभूतासु तनुषु गुणभिन्नासु गुणैः सत्त्वादि
भि

५। तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनु
षु अभव्यानामस्मिन्वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहै
के जडधियः ४

भिर्भिन्नासु अथवा गुणभिन्नासु ब्रह्मविष्णुशिवात्मकासु इह लोके केचिज्जडधियो मन्दबुद्धयो
ऽस्मिन्नैश्वर्ये व्याक्रोशीं निन्दां विदधते कुर्वते किं कर्तुं विहन्तुं विनाशयितुं किंभूतां व्या
क्रोशीं अभव्यानामसभ्यानामभव्यानां पापभाजां रमणीयां रम्यां पुनः किंभूतां परमार्थ २
तः अरमणीमशुभामित्यर्थः ४

भग॰

© Dharmartha Trust J&K. Digitized by eGangotri

नै

एतामेवव्याक्रोशीं प्रकटयन्नाह तिसृभिर्गुणभिन्नाभिस्तनुभिस्तवैश्वर्यं व्यस्तं इत्यनेन धाता रू
पेण सृजति विष्णुरूपेण पालयति रुद्ररूपेण संहरतीत्युक्तं तद्दूषयन्नाह किमीह इति ईश्व
रो धाता ब्रह्मरूपेण त्रिभुवनं सृजन् किमीहः सृजति का ईहा चेष्टा व्यापारो यस्य स तथो
क्तः त्रिभुवनं स्वर्गमर्त्यपाताले किंकायः सृजति कः कायः शरीरं यस्य स तथोक्तः त
था किमुपायः सृजति कः उपायः सामग्री यस्य स तथोक्तः किमाधारः सृजति कः ॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमु
पादान इति च अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोयं कांश्चि
न्मुखरयति मोहाय जगतः ५

आधारोऽधिकरणं यस्य स कुत्र स्थित्वा सृजतीत्यर्थः किमुपादानः सृजति कार्ये प्रथमसम
वैति तदुपादानं कारणं यथा घटस्य मृत्पिंडः उपादानकारणं पटस्य तन्तवः इत्येवं कुका
रणीभूय कुतर्कः जगतो जनस्य मोहाय भ्रमाय अस्माद् द्विते कांश्चित्पुरुषान् मुखरयति वा
चालयति किंभूतान् हतधियो मन्दबुद्धीन् किंभूतः कुतर्कः त्वयि अनवसरदुःस्थः अवस
रोऽवकाशः न अवसरः अनवसरस्तेन दुःस्थो दुर्बलो न्यून इत्यर्थः त्वयि विषये न स्यच्छन

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

म॰टी २ हे अमरवरदेवश्रेष्ठ अमी यत्ऽवयववन्तोऽपि लोकाः किमजन्मानः किं जन्मरहिताः न
विद्यते जन्म येषां ते ऽजन्मानः किं शब्दः आक्षेपे यथाऽवयववान् घटः जन्मेति नोपपद्य
ते यथा सावयवो घटः उत्पत्तिमानेव दृश्यते भवनं सावयवं उत्पत्तिमान् एतावता किल
भवनं उत्पाद्यं जन्मवतां जगतां लोकानां भवविधिः कृत्यं हि रचयितारं अनादृत्य अ
नपेक्ष्य भवति किं यतो यस्मात्कारणात् इमे मन्दाः स्वल्पबुद्धयो मीमांसकादयः त्वां प्रति

अजन्मानो लोकाः किमवयववन्तोऽपि जगतां अधिष्ठातारं किं भवविधिरनादृत्य
भवति अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेर
तइमे ६

त्वामुद्दिश्य संशेरते संशयं कुर्वन्ति अतस्त्वां प्रति संदेहो न कर्तव्य इत्यभिप्रायः एतावता के
पि किं तु नः पूर्वपक्षे भवत्वधिष्ठाता च एतावता किमीश्वरसिद्धिरित्यभिप्रायेणाह अनी
शः ईश्वरादन्योऽपि कुर्यात् एतदपि दूषयति भुवनजनने लोकोत्पादने कः परिकरः सा
य मर्थ्यः ईश्वरं विना नान्यः समर्थः इत्यर्थः ६ किं ३

त्रयाणां वेदानां समाहारः त्रयी सा एवैको मार्गः तथा सांख्यं कापिलशास्त्रं पंचविंशतितत्वोपल
क्षितमित्येको मार्गः योगो योगशास्त्रं वसिष्ठादि स एको मार्गः पशुपतिमतं शैवसम्मतेन शिद्धा
न्ताः शैवसिद्धान्तः सोमसिद्धान्तः पंचार्थसिद्धान्तः आमलसिद्धान्ताः स एको मार्गः वैष्णवाग
मः केशवपंचरात्रं नारदपंचरात्रं कापिलपंचरात्रादयो वैष्णवागमः अनेन प्रकारेण प्रस्था
ने मार्गे प्रभिन्ने नानात्वं गते सति प्रस्थीयते गम्यते ऽनेनेति प्रस्थानं मार्गः तस्मिन् प्रभिन्ने

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति
च रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ७

सति इदं प्रस्थानं परमुत्तममनेनास्मात्परमस्तीति एवं प्रकारेण रुचीनामिच्छानां वैचित्र्याद्भिन्न
त्वादृजुकुटिलनानापथजुषां केचिन्मार्गाः अकुटिलाः यतं जलाः केचिन्मार्गाः कुटिलाः
जुकुटिलनानापथजुषामनेकमार्गसेविनां नृणां मनुष्याणां त्वमेको गम्यः प्राप्योऽसि येन केन
मार्गेण गच्छतां त्वमेव प्राप्य इत्यर्थः पयसामर्णव इव यथा ऋजुकुटिलमार्गेण गच्छतां
जलानां समुद्र एक एव प्राप्यः तथा त्वमित्यर्थः ७

© Dharmartha Trust J&K. Digitized by eGangotri

म॰ टी॰ ५

महांश्चासौ उक्षा चेति महोक्षः महान्बलीवर्दः महोक्षः इत्यचतुरादिसूत्रेणाकारान्तो निपा
तं महोक्षाणपश्यन्नगौरीशरउक्षकारान्तो निपातः खट्वांगनरमंजरीपशुः कुठारः अजिनंस्रक्चभ
स्मभस्मसितपूणिनः सर्पाकपालशिरोस्थि चकारः समस्तद्वये प्रश्लेषोऽ यथा येन उपदेताव
त्तव वरद अभयद तवतन्त्रोपकरणं उपक्रियतेऽनेनेत्युपकरणमन्यप्रकारकमित्यर्थः तेन
रूपेण प्रयं च रूपेण स्थितमन्यपकरणमेतावदेव मह्यं हि संपदं विदधति धारयति किंस्वतां भ

महोक्षः खट्वांगपरशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणं सुरा
स्तां तामृद्धिं विदधति भवद्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८

वद्भ्रूप्रणिहितां भ्रूक्षेपमात्रेणोपनीतां दत्तामित्यर्थः यद्येवमेतावती शक्तिरस्ति तर्हि भ
गवान्स्वयं कस्मान्नोपभुङ्क्ते इत्याह नहीत्यादि स्वात्मनि स्वकीये आत्मनि आरमतीति स्वा
त्मारामं भगवन्तं विषयमृगतृष्णा न भ्रमयति न चालयति इंद्रियगोचरोऽर्थः विषय स एव मृ
गतृष्णा मरीचिका एतदुक्तं भवति भगवान्परमे योगी विषयैर्न निबध्यत इत्यर्थः ८ एम ५

© Dharmartha Trust J&K. Digitized by eGangotri

हे पुरमथन त्रिपुरमथन त्रिपुरदाहक कश्चिदिह मतदर्शनानुयायी सर्वमिदं जगत् ध्रुवं नित्यं ग
दति न कदाचिदनीदृशं जगत् इदं ब्रवीति अपरोऽन्यः क्षणभंगवादी बौद्धः जगदिदमध्रुवं क्ष
णिकं वदति परस्ततोऽन्यः क्षपणकः वीतरागी मध्यस्थमवलम्बमानः एतस्मिन् समस्ते ज
गति ध्रौव्याध्रौव्ये नित्यानित्यत्वे व्यस्तविषये वदति आकाशादि पंचकं नित्यं घटादिक
मनित्यमिति ब्रूते इत्यर्थः एवं नानाप्रकारैरेवंवद्भिस्तैर्विस्मितोपहसितो व्याकुलित इवाहं

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविष
ये समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मु
खरता ९

स्तुवन् जिह्रेमि लज्जे न ह्रिस्तैर्लोक ये प्रवर्त्तेऽसौ तत्राह मुखरता वाचालता न तु प्रभो न धृ
ष्टा खलु नवलवलीन प्रगल्भा न शोभते इत्यर्थः इदानीं पुराणप्रसिद्धं ब्रह्मविष्णोरन्वेष्ट
ह पं र लिंगादेवस्तत्राह ध्रुवस्य भावं ध्रौव्यं अध्रुवस्य भावं अध्रौव्यं ध्रौव्यं च ध्रौव्याध्रौ
व्ये ब्रवीति वक्ति ९

त्र ध्रौव्यं च

का:

हेगिरिशशंकरतवयदैश्वर्यंमाहात्म्यंतवैश्वर्यंयत्नात् महताप्रयत्नेनपरिछेत्तुंपतावता
दितिनिश्चेतुमुपरिऊर्ध्वंविरिंचिर्ब्रह्मायातः अधःपातालंहरिर्विष्णुर्यातः इतिद्वावपि
म॰टी॰ यातौअनलंपरिछेत्तुमशक्तौकिंभूतस्यतवअनलस्कंधवपुषः अनलस्कंधोऽग्निस्तंभ
५ ह्वावपुःशरीरंयस्यतस्यक्वचिदनिलस्कंधइतिपाठस्तत्रवायुशरीरस्यततःपश्चाद्भक्ति
श्रद्धाभरगुरुगृणद्भ्यांभक्तिर्भजनंश्रद्धाविश्वासस्तयोर्भरेणमहत्वेनगुरुगृणाःऽथि

तवैश्वर्यंयत्नाद्यदुपरिविरिंचिर्हरिरधः परिछेत्तुंयातावनलमनलस्कंधवपुषः
ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थेताभ्यांतवकिमनुवृत्तिर्न
फलति १०

कंयथाभवतितथागृणद्भ्यांताभ्यांब्रह्मविष्णुभ्यांतवैश्वर्यंस्वयमेव तस्थेस्वेनैवप्रका
शितमित्यर्थः प्रतिज्ञानिर्णयप्रकाशनेषुस्था इतितिष्ठते आत्मनेपदंयथाछात्रायतिष्ठते
कुमारीतिवदर्थेचतुर्थीहेदेवतवानुवृत्तिःसेवाकिंनफलतिकिंनप्रयच्छतिसर्वमपिफ ५
लतीत्यर्थः १०

© Dharmartha Trust J&K. Digitized by eGangotri

तदेवद्रढयितुमाह हे त्रिपुरहर दशास्यो रावणोऽयत्नादनायासेन त्रिभुवनं त्रिलोकं अवैरि
व्यतिकरं शत्रुसंपर्करहितमासाद्य संप्राप्य बाहून्रणकण्डूपरवशान् रणे या कण्डूः खर्जूस्त
या परवशान् तदधीनान् युद्धलंपटानित्यर्थः बाहून् यदभृत धृतवानिति यत्तदिदं स्थिरा
यास्त्वद्भक्तेः स्फूर्जितं स्फुरणं विजृम्भणं शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः शिरां

अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशा
न् शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर वि
स्फूर्जितमिदं ॥

स्येव यानि पद्मानि तेषां श्रेणिः पंक्तिस्तया रचितानि निर्मितानि कृतानि चरणाम्भोरुहद्वयोः पादप
द्मयोर्बलिः पूजा यस्य सोऽसौ तथोक्ता तस्यास्त्वयि भक्तेः फलं निरूपितम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मटी
६

इदानीं त्वच्छक्तितिरस्कारफलं निरूपयितुमाह अमुष्य रावणस्य पाताले रसातले प्रविष्टा
अलभ्या दुर्लभा आसीत् किंभूतस्य भुजवनं भुजसमूहं बलाद्यत्नात् त्वदधिवसतौ त
वनिवासस्थाने कैलासे विक्रमयतः किंभूतं भुजवनं त्वत्सेवासमधिगतसारं भ
वदाराधनेन समधिगतः सारो बलं येन तत् तथोक्तः कस्मिन् सति त्वय्यऽलसचलि

6

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेऽपि त्वदधिवसतौ विक्रम
यतः अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुप
चितो मुह्यति खलः १२

ताङ्गुष्ठशिरसि सति अलसेनानायासेनाऽप्रयत्नेन चलितं अर्थः कृतम् अङ्गुष्ठशिरो येन सो
ऽलसचलिताङ्गुष्ठशिरस्तस्मिन् सति अत्रातो ध्रुवं निश्चितमुपचितः संपन्नः स
मृद्धः खलो दुर्जनो मुह्यति दृप्यतीति १२ ६

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीं बाणासुरानुग्रहोक्त्या किलं भगवन्तं स्तुवन्नाह । बाणो बाणासुरः सुत्राम्णो वा
सर्वस्य हि संपदं सुरेन्द्रत्वमधः करोति किंभूतामृद्धिं परमोच्चैः सतीमपि परमोन्न
तामयीत्यर्थः । किंभूतो बाणः परिजनविधेयत्रिभुवनः परिजनस्येव विधे

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रि
भुवनः । न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शि
रस्त्वय्यवनतिः ॥ १२ ॥
स्त्व

यद्वश्ये त्रिभुवनं वशं यस्य स तथोक्तः । तस्मिन्बाणे न तच्चित्रमाश्चर्यं किंभूते त्वच्चर
णयोस्त्वत्पादयोर्वरिवसितरि शुश्रूषके कथमित्याह । न हि शिरसो मस्तको
ऽवनतिः प्रणामः कस्याऽप्युन्नत्यै न भवति अपि तु सर्वोन्नत्यै भवतीत्यर्थः ॥ १३ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

म·टी·
७

सोप्रन्ते कालकूटविषापरुरणमनिपादन द्वारेण भगवंतं स्तुवन्नाह अकांडे
त्रिनेत्रिनयनविषं कालकूटं संहृतवतः [illegible] वतो निगिलनतस्तव कंठे गले यः कल्माषः
कालकस्यंदिमा आसीत्तं जातः स श्रियं शोभां न कुरुते अपि तु कुरुत एव अहो आश्चर्ये किं

अकांड ब्रह्मांड क्षय चकित देवासुर कृपा विधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः
सकल्माषः कंठे तव न कुरुते न श्रियमहो विकारोपि श्लाघ्यो भुवनभयभंग
व्यसनिनः १४

विधेयस्य तव अकांडे अप्रस्तावे ब्रह्मांडक्षये विनाशे [illegible] किंवा भीताः ये देवाः असु
रास्तेषु कृपा दयापात्रस्य विधेयस्य संपादकस्य मनुष्य स्फटिकसदृशे कनाललद्गोण विका ७
रः कथं शोभां कुरुते इत्याह विकारोपीत्यादि भुवनभयभंग व्यसनिनः प्रकृष्ट
प्रकारोंतरप्रापि श्लाघ्य इत्यर्थः १४ रामः रामः रामः रामः श्रीरामः रामः

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीं कामनिग्रहरूपां स्तुतिमाह यस्य स्मरस्य विशिषा वाणा जगति लोके क्व
चिदपि असिद्धार्था अकृतकार्या नैव निवर्त्तन्ते किंतु नित्यं कार्यकारिणो भवंती
त्यर्थः किंभूतस्य जयिनः जयनशीलस्य किंभूते जगति सदेवासुरनरे देवा
श्चासुराश्च नराश्च तैः सह वर्त्तमाने तन्न देवासुरनरे तस्मिन् स्वर्गमर्त्यपातालरूपी त्यर्थः

१

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्त्तन्ते नित्यं जगति जयिनो यस्य ।
यस्य विशिखाः स पश्यन्नीश त्वामितरसुरसाधारणमभूत्स्मरः स्म
र्तव्यात्मा न हि वशिषु पथ्यः परिभवः १५

हे ईश्वर स त्वामितरसुरसाधारणमतादृशं तुल्यं पश्यन्नवगच्छन् स्मर्तव्या-
त्मा स्मरणीयो भूत् अशरीरोऽभूदित्यर्थः अतो जितेः वशिष्वात्मेश्वरेषु परि-
भवोऽवज्ञानं पथ्यो न हितः सुखकारी न भवतीत्यर्थः १५ राम राम राम रामः ।

© Dharmartha Trust J&K. Digitized by eGangotri

म. टी. ८

कश्चिन्नास्तः संध्यासमये जगदिदं अतपि नु ममयुक्तमान्नि वारणं घं तस्मिन्का
ले भगवांस्ताण्डवं करोति से प्रतिनां ताण्डवं बद्धा स्तुतिं करोमि आह हे देव जगद्रक्षायै लोकत्रा
णाय त्वं नटसि नृत्यसि ताण्डवं करोषि ननु वामैव विभुता महितेन कथमित्याह मही
पृथ्वी पादाघातात् ताडनात् सहसा शीघ्रं संशयपदं व्रजति अस्ति नास्ति वा संदेहं
गच्छतीत्यर्थः तथा विष्णोः पदमाकाशं भ्राम्यद्भुजपरिघरुग्णग्रहगणं भवति

मही पादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं मु
हुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता १६

भ्राम्यन्तश्च ते परिघा अर्गला इव भुजाश्च तैः परिघवत्परिघाभ्यां गत्वा स्तै रुग्णा भग्नाश्च ग्रहगणा नक्ष
त्राणां गणाः समूहा यस्मिन् तत्तथोक्तं भ्राम्यद्भुज परीन्येयौ स्वर्गः मुहुर्मुहुर्दौस्थ्य
त्वं याति गच्छति सा किंभूता अनिभृतजटाताडिततटा अनिभृता नाभिनिश्चला
जटाभिस्ताडितं तटं पार्श्वं यस्याः सा तथोक्ता १६ रामः रामः श्रीरामः रामः रामः

वंयतामिः

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वं गगनस्थितमन्दाकिन्याः स्वरूपमाह । नो जलनिधिस्थितेन परमेश्वरेण देवैः पुनरभ्यर्थि-
तेन भगवता गङ्गाजलैः परिपूरितेन स्वावधारितिकर्तुमाह । हे देव वारां पयसां
यः प्रवाहः कीदृशो वियद्व्यापी सप्रवाहस्तेन वर्णितमस्ति जटामुकुटे पृषतवज्जलविन्दु-
वल्लघुसूक्ष्मं यद्यथा भवति तथा दृष्टः । वियदाकाशं व्याप्नोति व्यापी । पुनः कीदृशः । किं-
विधः तारागणगुणितफेनोद्गमरुचिः तारा नक्षत्राणि तेषां गणाः समूहाः तारागणाः तारागणैः

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृ-
ष्टः शिरसि ते जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतम-
हिम दिव्यं तव वपुः ॥ २ ॥

गुणितः तारागणगुणितफेनोद्गमरुचिः कान्तिर्यस्य स तथोक्तः । तेन प्रवाहेन जगद्द्वीपा-
कारं कृतं तेन जलमथास्थितेनाभूत् । द्वीपः न समुद्रपरिकरितं किंविधं जलधिः समुद्र-
वलयं यस्य स तथोक्तः । अनेनैवाहेतुना नवविध्याः सदा नेद्धान्मकं वपुः शरीरं धृ-
तमहिमेनैवोन्नेयं दिव्यं हिनीयं अनुमेयं महिमा सर्वत्र त्वं सर्वकर्तृत्वं च येन वपुः ॥ २

मं॰ टी॰ ५

ऽं प्रति त्रिपुरदहनादुं वरविषयां स्तुतिमाह हे देवि त्रिपुरं तन्तं दिधक्षोर्दग्धुमिच्छो
र्लेनवकेऽरयस्मादुं वरविधिः कोयं संभ्रमः अयं संभ्रमः किमर्थमिति निपावन
तमेवादुं वरं दर्शयितुमाह रथः क्षोणी भूमिः यन्ता सारथिः शतधृतिर्ब्रह्मा अ
गेन्द्रो हिमवान् धनुः अथानंतरं रथांगे चक्रे चंद्रार्कौ सोमसूर्यौ रथचरणपा

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथांगे चंद्रार्कौ रथचरणपा
णिः शर इति दिधक्षोस्ते कोयं त्रिपुरतृणमाडुं वरविधिर्विधेयैः क्रीडन्त्यो
न खलु परतंत्राः प्रभुधियः १८

णिः विष्णुः शरो बाणः इति शाङ्कपाणिस्तवने अथवा पुनरेवं नित्यप्रभुधियः स्वा
मीनां बुद्धयः फलं ज्ञानं खलप्रलयप्रदानानि भवंति यावत्फलं सिद्ध्यति तावदा
डम्बरम् संपादयन्तीत्यर्थः किं विधाप्रभुधियः विधेयैर्भृत्यैर्जनैः सह क्रीडन्त्यो
विनोदयन्त्यः त्रिपुरदहनं त्रिपुरदहनम् १८ ॥ ॥

५

हरिस्त्रिकलाभा परेश्वरपदयोः कमलसहस्रपूजां कृतवानस्य वंधोरस्तुतिमाह हे त्रि
पुरहर हरिर्नारायणस्तेन त्वत्पदयोश्चरणयोः साहस्रं सहस्रसंख्योपेतं कमलब॰
लिं पादपूजामाधाय निहितम् तस्मिन्वलोनएकोने एकेन हीने सति निजमानमी

हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्र
कमलं गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपु
रहर जागर्ति जगताम् ॥ १९॥

यं नेत्रकमलं कमलाकारं नेत्रमुदहरन् उद्धृतवान् असौ भक्त्युद्रेकः भक्त्याति
शयः चक्रवपुषा सुदर्शनरूपेण परिणतिं परिणामं गतः सन् त्रयाणां जगतां स्वर्गम
र्त्यपातालानां रक्षायै जागर्ति सावधानस्तिष्ठति अप्रमत्तस्तिष्ठतीत्यर्थः ॥ १९ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

म. टी.
२०

इदानीं मीमांसावादी यो वेदस्य नित्यत्वं मन्यमानो न कदाचिदनीदृशं जगदिति प्रतिपादयन् भगवतो जगत्कर्तृत्वं न प्रतिपादयते तन्मतनिराकरणद्वारेणादेवं स्तोतुमाह इहेदं वक्तव्यो यागस्य क्रियात्मकत्वेनाशुतिरोधं सितत्वात् लब्धुं स्वर्गमेकं नोक्तेन विनष्टस्य क्रतुमतां यज्वानां फलयोगे स्वर्गादि फलसंबन्धे त्वं जाग्रदसि फलदातृ

मति

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते। अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा
दृढपरिकरः कर्मसु जनः २०

भवति

सावधानोऽसि काम्यमेतदित्याह प्रध्वस्तं विनष्टं कर्म क्रिया पुरुषाराधनं ते
पुरुषाराधनं विना क्व फलति न क्वापीत्यर्थः अतः कारणात् त्वां लोकः क्रतुषु फ
लदानप्रतिभुवं फलदातारं संप्रेक्ष्य विचार्य श्रुतौ वेदवाक्ये श्रद्धां बद्ध्वा वि
श्वासं कृत्वा कर्मसु यागेषु कृतपरिकरः कृतप्रयत्नः

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीं पूर्वश्लोके नियममेवार्थं दृढयन्नाग्रेण ग्राहयन्ननेन इष्टीकुर्वन्नाह हे शत्रुदमन इह क्रि
यादत्तः क्रिया संयोगेषु कुशलो दत्तो दत्तप्रज्ञा पतिः कृतपातिरथ मानः किं भूतः
नव भूतानां शरीरिणाममधिपतिरीशः प्रजापतिर्वा न अनवाप्तमादि स्वयम्भूर्योव
शिष्टदयपर्व ऋ इति नदृत्यर्थः सर्वगणाद्दत्तादयः एव सदस्याः सदक्षि स्थिताः एवं
विधा सामग्री नक स्यापि दत्तः सोवनज्ञो भगवतः स कश्चादेव कृतमग्रसः यायाम्

क्रियास्ततो दत्तः कृतपातिरथो शास्त्रनुभूता मृणीमालिंगं शरणाद्स्याः सर्व
गणाः कृतभ्रष्टास्ततः कृतफलविधानवासनिनोऽथ वेकानः कृष्टाविष्ट
रमभिवाञ्छायदिमत्तो: २१

शोभूनकिं विधास्ततः कृतफलविधानवासमितः कृतोः फलस्यविधिर्न संख्यादने
वासनिनः उत्तकातः एतदुक्तं भवति त्वयि भक्तिहीनस्य दृढस्यतः [illegible]
नफलस्य प्रितिनं संज्ञाता शुक्रमेतत् धर्वनिस्थितस्य दृष्टाविधुरं विष्णाशारद्दितंय
स्याभवति तथा कर्त्तः कुर्वतः शुभमपमात्राया गायत्रभिरायाऽनर्थाय भवती
ति २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

म॰
रा॰

॥ संप्रति ब्रह्मणो दुहितृरभिलाषकस्य निग्रहसामर्थ्यमैश्वर्यं त्वत्त्वन्नाह हे नाथ मा
मिन धनुष्पाणेस्तव मृगव्याधरभसो मृगवपुषो प्रज्ञानाथं ब्रह्माणमद्यापि
त्यजति न मुञ्चति किंभूतं प्रज्ञानाथं प्रसभमत्युत्थम् अभिकं कामुकं स्वतनु
व स्वां दुहितरं स्वतनुजां कस्य वपुषा मृगशावो दितो हि रमयितुं स्वमिष्टं गते

प्रज्ञानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य
वपुषा धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न
मृगव्याधरभसः २२

किंविधं दुहितरं रोहिद्भूतां मृगीरूपधारिणीं जातामित्यर्थः किंविधं प्रज्ञानाथं
त्रसन्तं भीतं च किं तं त्रस्तं एव दिवमाकाशं यातं पुनः किंभूतं सपत्राकृतं सपत्रं शा ॥
रमस्य शरीरे प्रवेशितमित्यर्थः ब्रह्मा इति कामुक हे नम्र तीक्ष्णा स्वतनुना मृगरूपे
णारं गतः अनेन धर्मिणा मनेन स्वशरीरेण हे तु त्वदीय मृगायुधं त्वा अद्यापि न त्या
ज्यं न गच्छतीत्यर्थः २२ श्री रामजी श्री नारायण राम

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीमपि वमेतौ इष्येते सांप्रतं गौरीचूताभिमर्दनपुरःस्मरं भगवानतःपरमयो
गिनं स्मेतमाह हे पुरशासन अहं ह्याधीनं तत्त्वमेवतनत्वमभिवस्तं गंधुनध
नेषु गृहीतवायं पूर्वमाद्युगं स्मरं नं पुरोऽग्रतो दृष्ट्वाऽपि गौरी देवी हेयमनिरतदे
हार्धघटनात् देहार्धे अर्धनारीरघटनान्न योजनतात्वा परिहेणं परं तत्त्रेह्वी वशा

स्खलावण्याशं साधूतधनेषमहाय तत्त्वमेवतत्पुरः स्वयं दृष्टा पुरमथनपुरुषा
पुधमपि यदि चित्तं देवी समनिरतदेहार्धघटनादेवेति नामसहावनवर
दमृगया युवनयः २२ ॥ ॥

मवैति जानाति चेत् नर्हि वरदअहानि स्थितं युवनयः स्त्रियो मृगयावत् अहो किं
भूता गौरी स्खलावण्याशं आत्मसौंदर्यकीर्तिं यंनी यमेषु नियमेषु नितरामन्व
र्थं रतो योगनत्रमा संवहोऽयमनिरत् २३ ॥

ग्री

© Dharmartha Trust J&K. Digitized by eGangotri

म॰ सांप्रतं शंकितावर्त्तनेन प्रकाराभावपुरस्सरं स्तोता नमाह । हे वरद हे स्मरहर हर तव श्मशाने-
टी॰ ष्वपितृकानने ष्वाक्रीडा विहरणं तव पिशाचाः सहचराः सहवासिनः तथा आलेपो
१२ नुलेपनं चिताभस्म मनुष्यशरीरदहनायोपचितः काष्ठनिचयश्चितातज्जं भूवं भ-
स्मितं तव स्रगपि नृकरोटीपरिकरः नरकपालसमूहरूपं वमनेन प्रकरेण तवा

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृ-
करोटीपरिकरः । अमंगल्यं शीलं तव भवतु नामैवमखिलं तथापि स्म-
र्तॄणां वरद परमं मंगलमसि २४

१२

खिलं शीलं स्वभावः अमंगल्यं अशुभं भवतु नाम निश्चितं तथापि स्मर्तॄणां
चिंतयतां परमं मंगलं हे भगवन् मंगलमसि २४ चिता याः जातं भस्म चिताभस्म चिता-
भस्मना आलेपः तत्तथोक्तः ॥ ॥ ॥ ॥

12

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीं भगवतः परमतत्त्वनिरूपणद्वारेणाद्वैतमेव प्राह ॥ हे देव यमिनो योगिनोऽन्त
र्गात्मनि किमपि तत्त्वमालोक्य सच्चिदानन्दरूपमप्रमेयमगोचरं वस्तु हृष्टा हृष्टा हंस
त्वदृष्टिं धारयन्ति किं कृत्वेव अमृतमये अमृतस्वरूपे ह्रदे जलाशये निमज्ज्य म
ग्नाः पिबन्ति वत तत्त्वं भवान् त्वमेव किल शम्भुः प्रसिद्धो किं कृत्वा प्रत्यग्विषयेभ्यो व
लयित्वा आत्मनि मनो नयन्तः सविधं समीपे काऽपि योगशास्त्रोक्तं यथा भवति तथा

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलो-
त्सङ्गितदृशः । यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यन्तस्तत्त्वं
किमपि यमिनस्तत्किल भवान् २५ ॥ ॥ ॥

वस्थाप्य किंभूताः यमिनः आत्ता गृहीता निरुद्धा मरुतः प्राणादिवायवो यैस्ते तथो
क्ता तथा प्रहृष्यद्रोमाणः प्रहृष्यन्ति पुलकितानि रोमाणि लोमानि येषां
ते तथोक्ताः प्रमदसलिलानि हर्षाश्रूणि तैरुत्सङ्गिता पूरिता दृग् दृष्टिर्ये
षां ते २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आत्तमरुतः

© Dharmartha Trust J&K. Digitized by eGangotri

म
टी
५

सांप्रतं त्वष्टमूर्तिद्वारेण भगवंतं स्तवन्नाह हे देव त्वमर्कः सूर्योसि एवं सोमादि
रूपस्त्वं त्वमात्मा परमात्मा त्वमसि एवमनेन प्रकारेण परिछिन्ना[illegible]यंतयः वि

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योमत्वमु धरणिरा
त्मा त्वमिति च परिछिन्नामेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्त्वं
वयमिह हि यत्त्वं न भवसि २६ ॥

13

शिष्टां गिरं वाणीं त्वयि परिणतास्त्वन्मद्रूपविदो बिभ्रतु वयं त्विह लोके यत्त्वं न
भवसि तत्तत्त्वं वस्तु न वि[illegible] न जानीमः २६

श्री

© Dharmartha Trust J&K. Digitized by eGangotri

उदात्तानी प्रतिपाद्यत्वेन भगवंतेनोक्तमाह हे शारदे ओमिति पदं प्रणा-
वः समस्तव्यस्तस्वरूपेणोच्चारविभागेन त्वां गृणाति स्तौति किंविध-
अकाराद्यैर्वर्णैस्त्रिभिरकारोकारमकारैरेतान्यभिदधत् कानि त्रयी आ-
गमाः तासामानि ति स्तौ हृन्नी: उदात्तानुदात्तस्वरितानि त्रिभुवने स्वर्गमर्त्यपाता-
लं अग्नेर्नराः त्रीनि हुता न पित्र ह्य विस्नुकद्रान् अकारेणामृगुदान्तस्वस्वरा

त्रयीति स्तो हन्नी त्रिभुवनेम ध्यो जीन पितृ नकाराद्यैर्वर्णैस्त्रिभिरभि-
दधन्तीर्णोविकृतिनत्तरीयेने धामप्रतिनिभि विवहंपान मणेभिः समस्त
व्यस्तेनोच्चारणेन गृणात्योमितिपदं ॥

अभिधीयते तथोकारेणायुजुर्वेदान्तदान्तस्वरमन्तर्विसमभिधीयते तथामकारे-
णासामवेदस्वर्दिनस्वरपातालकद्राभिधीयते किंविधं ओंकारेणेन वक्तरीपव-
वर्थं धामस्थानं तेजो वाअनेभिरतितं अमृतोर्ध्व निभिरवरुः धाने ओमभुवन किं-
भूतं धाम तमोणोविकृतिमीणोविकृतिर्येन तत्री णोविकृतिविकारस्तन्निमित्त-
र्थः राम श्रीराम राम श्रीराम राम श्रीराम राम श्रीराम राम

© Dharmartha Trust J&K. Digitized by eGangotri

म॰ टी॰ १५ रुद्राणीनामाष्टकपाठेण स्तुतिमाह हे देव यदेतन्नवा अभिधानाष्टकं अ
मुष्मिन्नामाष्टके श्रुतिर्वेदोऽपि प्रत्येकमेकमेकं प्रति प्रविचरति वर्त्तते अति
हेतोः प्रियायास्मै धाम्ने एवं श्लोकमानियादिगाय

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भीमेशानाविति
यदभिधानाष्टकमिदं अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि प्रि
यायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते २८ ॥ १५

तेजोरूपाय भवते तुभ्यं प्रणिहितनमस्योऽस्मि कृतनमस्कारोऽस्मि अथवा
हे देव प्रियायास्मै धाम्ने तुभ्यं तेजसे प्रणिहितनमस्योऽस्मि २८ राम

© Dharmartha Trust J&K. Digitized by eGangotri

उद्दानींभगवनःश्रकरहृपलोंप्रतिमादयज्ञाद्, नेदिष्ठाय श्रंतिकतमायशिवायनमः नि
कटवर्त्तिनेव भ्यंनमस्तन्त्र्यः हेप्रियदवप्रियोरवोबृनेयस्सः प्रियदवःनस्समेवु है
हेप्रियदवस्वविष्टायहरनरायशिवायनमः नेयाह्नादिष्टायदत्तुद्रनरायनमः हेस्स

नमोनेदिष्टायप्रियदविष्टायचनमोनमः होदिष्टायस्मरहरमदिष्टायचन
मः नमोवर्षिष्टायत्रिनयनयविष्टायचनमोनमः सर्वस्मैनेनदिदमनिन
सर्वायचनमः २९

रहरमदिष्टाय मदनमायनमः नयावर्षिष्टायदहनरायनमः हेत्रिनयनयवि
ष्टायत्रुवनरायनमः नयासर्वस्मैनेनमः नयानिसर्वायसर्वमनिक्रांतायनमभ्यं
नदिदंनमःश्रेयनमस्कारस्तन्त्र्यः २९

© Dharmartha Trust J&K. Digitized by eGangotri

२५ शिवमहिम्नःटी॰

रुद्रांनी संरक्षणानंजललिप्रक्रियया स्रवत्वात् रजोगुणाद्युत्पत्तिहेतुत्वः नमः नाशहेतुत्व
त्वः हितो नरे हन्ता ईश्वरो यदा ज्ञानिकोनि नदा रजोगुणस्वरूपो भवति यदा नाशयति न
दा न मोयुक्तो भवति यदा हितं करोति नदा सत्वगुणयुक्तो भवती नदा श्रिल्कात्
विश्वान्तश्रो जगत्स्थितिहेतुक नेयनाधो बकुलरजसे नमः अधिकरजोगुणयुनमोन
मः जगदुत्पत्तौ भवत्स्वरूपत्वात् नदत्तगुणो न भवशब्देन नमस्कारः नत्संहारे तु गता
शाने प्रबलनमसे अधिकमोगुणाय हरायनमः संहारस्य नाशरूपत्वान् नदत्तगुणो नरः

बकुलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः ॥
जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो

नमः सत्वेन नमस्कारः कृतः सत्वोत्पन्नौ सत्वोजगत्पालन गुणोद्रेके सति जननसुखकृतेनेजन
हितं करायमृडाय नमो नमः मृड सुखे अन्यसम्बन्धनो कर्तरि मृड इति रूपं सत्वगुणस्य सुखस्व
रूपत्वात् नदत्तगुणो मृडशब्देन नमस्कारः कृतः नथा प्रमहसि प्रकृष्टे तेजसि निस्त्रैगुण्ये
गुणत्रयारहिते निष्कलेपदे स्थाने शिवाय नमः यदा करुणः प्रकृतित्रयातीत दासर्वगुणस्याभ
वान्पदस्य निस्त्रैगुण्यं भवति स च नः केवलमंगलरूपत्वान् नेतु चिन्नेन शिवशब्देन नमस्का

स्पष्टीकृतानि मन्त्राणि इति नमो नमः कृतः

© Dharmartha Trust J&K. Digitized by eGangotri

कृश्णपरणतिः

१दानीमभिहितार्थसिद्धेः समुत्थानामास्मीयमानस्वकं परिहरन्नाह । इदं मदीयं चोनो मानसं क्ले
किं भवेत् क्लेशपरिणामनिःपरिणामोपमनन्तत्वम् विचारगोचरमित्यर्थः । नयाक्लेशाव
स्थं पञ्च दुःखपराधीनेन वृक्षस्येह मे दिश्याक्लक्किं भवेन्नाशात्मनो वैराग्यमासीमोक्षत्वचित्तिनीगुण
मयो दामनिक्लेशानां त्यनेन प्रकारेण च किन्नं भोगं मोदह्वरर नवचरणाय्यो भक्तिः अम

क्लेशपरिणामिचेनाक्लेशावस्थं पञ्चक्लेशं क्लेशवनवगुणासीमोक्षत्वचित्तिनी शास्त्रहद्दिः
इति च किन्नम मन्दी कृष्णमां भक्तिरधाहर दचरणायोस्नेवाक्यावृष्यापहारमः ११

दीक्षाय भीनिरदितं नेह क्लेशान् वाक्यावृष्यापहारसमाधानवृक्षान्येव वृत्त्यापि गिनेषांऽदत्तं ए
तामकल्पयन ११ अविद्यास्मितारागद्वेषाऽभिनिवेशाः पञ्चक्लेशाः । क्लेशावस्थं प
विप मीनन्तानम विद्याभिन्नः पावे हान्ना नोपेकाप्रनीनिरस्मितासरोग धूसक्तिः रागः दुःख
षश्री निद्वेषः अनवमनादपि मरणादेस्त्रासोऽभिनिवेशः इति पञ्चक्लेशाः राम राम

© Dharmartha Trust J&K. Digitized by eGangotri

हे ईश हे स्वामिन् असितगिरिसमं अंजनगिरितुल्यं कज्जलं स्यात् सिंधुपात्रे यदि सुरतरुव
२६ रशाखा लेखनी स्यात् उर्वी पत्रं स्यात् यदि शारदा सरस्वती सर्वकालं लिखति तदपि तव
गुणानां पारं न याति ३२

असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी लिखति यदि
गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति ३२ असुरसुरमुनीन्द्रैर
र्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य सकलगणवरिष्ठः पुष्पदन्ताभिधा
नो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ३३ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परम
भक्त्या शुद्धचित्तः पुमान्यः स भवति शिवलोके रुद्रतुल्यस्तथात्र प्रचुरतरधनायुः पुत्रवा
न्कीर्त्तिमांश्च ३४ दीक्षा दानं तपस्तीर्थं होमयज्ञादिकाः क्रियाः महिम्नस्तवपाठ
स्य कलां नार्हन्ति षोडशीं ३५ समाप्तोयं सुमे स्तोत्रं सर्वमीश्वरवर्णनं अनुपमं म
नोहारि शिवसंगं गन्धर्वभाषितं ३६ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं
गुरोः परं ३७ कुसुमदश १

16

© Dharmartha Trust J&K. Digitized by eGangotri

ननामा सर्वगंधर्वराजः शशिधरवरमौलेर्देवदेवस्य दासः स गुरु निजमहिम्नो भ्रष्ट ए-
वास्य रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ३८ सुरवरमुनिपूज्यं स्वर्गमोक्षै-
कहेतुं पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः व्रजति शिवसमीपं किन्नरैः स्तूयमा-
नः स्तवनमिदममोघं पुष्पदंतप्रणीतं ३९ श्रीपुष्पदंतमुखपंकजनिर्गतेन स्तो-
त्रेण किल्बिषहरेण हरप्रियेण कंठस्थितेन पठितेन समाहितेन संप्रीणि-
तो भवति भूतपतिर्महेशः ४०॥ इति श्रीपुष्पदंताचार्यविरचितं महिम्नस्तोत्रं
समाप्तम्॥ ॥ ॥ ॥ ॥

समाप्तश्चायं महिम्नस्तोत्रटीकायां॥ राम श्रीराम॥ राम राम रा

॥ ॐ शुभमस्तु लेखकपाठकयोः॥

© Dharmartha Trust J&K. Digitized by eGangotri